Annapurna Stotram

श्रीअन्नपूर्णास्तोत्रम्

SHLOKA · श्लोक

1 नित्यानन्दकरी वराभयकरी सौन्दर्यरत्नाकरी
निर्धूताखिलघोरपावनकरी प्रत्यक्षमाहेश्वरी।
प्रालेयाचलवंशपावनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥ १॥

Nityananda kari varabhaya kari saundarya ratnakari
Nirdhutakhila ghora pavana kari pratyaksha maheshvari.
Praleyachala vansha pavana kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

2 नानारत्नविचित्रभूषणकरी हेमाम्बराडम्बरी
मुक्ताहारविलम्बमानविलसद्वक्षोजकुम्भान्तरी।
काश्मीरागरुवासिताङ्गरुचिरे काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥ २॥

Nana ratna vichitra bhushana kari hemambaradambari
Mukta hara vilambamana vilasad vakshoja kumbhantari.
Kashmiragaru vasitanga ruchire Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

3 योगानन्दकरी रिपुक्षयकरी धर्मार्थनिष्ठाकरी
चन्द्रार्कानलभासमानलहरी त्रैलोक्यरक्षाकरी।
सर्वैश्वर्यसमस्तवाञ्छितकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥ ३॥

Yogananda kari ripu kshaya kari dharmartha nishtha kari
Chandrarkanala bhasamana lahari trailokya raksha kari.
Sarvaishvarya samasta vanchhita kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

4 कैलासाचलकन्दरालयकरी गौरी उमा शङ्करी
कौमारी निगमार्थगोचरकरी ओङ्कारबीजाक्षरी।
मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥ ४॥

Kailasachala kandaralaya kari Gauri Uma Shankari
Kaumari nigamartha gochara kari onkara bijakshari.
Moksha dvara kapata patana kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

5 दृश्यादृश्यविभूतिवाहनकरी ब्रह्माण्डभाण्डोदरी
लीलानाटकसूत्रभेदनकरी विज्ञानदीपाङ्कुरी।
श्रीविश्वेशमनःप्रसादनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऩ्नपूर्णेश्वरी॥ ५॥

Drishyadrishya vibhuti vahana kari brahmanda bhandodari
Lila nataka sutra bhedana kari vijnana dipankuri.
Shri Vishvesha manah prasadana kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

6 उर्वीसर्वजनेश्वरी भगवती माताऩ्नपूर्णेश्वरी
वेणीनीलसमानकुन्तलहरी नित्यान्नदानेश्वरी।
सर्वानन्दकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऩ्नपूर्णेश्वरी॥ ६॥

Urvi sarva janeshvari bhagavati matannapurneshvari
Veni nila samana kuntala hari nityanna daneshvari.
Sarvananda kari sada shubha kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

7 आदिक्षान्तसमस्तवर्णनकरी शम्भोस्त्रिभावाकरी
काश्मीरात्रिजलेश्वरी त्रिलहरी नित्याङ्कुरा शर्वरी।
कामाकाङ्क्षकरी जनोदयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऩ्नपूर्णेश्वरी॥ ७॥

Adikshanta samasta varnana kari Shambhos tribhava kari
Kashmira trijaleshvari trilahari nityankura sharvari.
Kamakanksha kari janodaya kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

8 देवी सर्वविचित्ररत्नरचिता दाक्षायणी सुन्दरी
वामं स्वादुपयोधरप्रियकरी सौभाग्यमाहेश्वरी।
भक्ताभीष्टकरी सदा शुभकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी माताऩ्नपूर्णेश्वरी॥ ८॥

Devi sarva vichitra ratna rachita Dakshayani sundari
Vamam svadu payodhara priya kari saubhagya maheshvari.
Bhaktabhishta kari sada shubha kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

9 चन्द्रार्कानलकोटिकोटिसदृशा चन्द्रांशुबिम्बाधरी
चन्द्रार्काग्निसमानकुन्तलधरी चन्द्रार्कवर्णेश्वरी।
मालापुस्तकपाशसाङ्कुशधरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥ ९॥

Chandrarkanala koti koti sadrisha chandranshu bimba dhari
Chandrarkagni samana kuntala dhari chandrarka varneshvari.
Mala pustaka pasha sankusha dhari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

10 क्षत्रत्राणकरी महाऽभयकरी माता कृपासागरी
साक्षान्मोक्षकरी सदा शिवकरी विश्वेश्वरश्रीधरी।
दक्षाक्रन्दकरी निरामयकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलम्बनकरी मातान्नपूर्णेश्वरी॥ १०॥

Kshatra trana kari mahabhaya kari mata kripa sagari
Sakshan moksha kari sada Shiva kari Vishveshvara shridhari.
Daksha kranda kari niramaya kari Kashipuradhishvari
Bhiksham dehi kripavalambana kari matannapurneshvari.

11 अन्नपूर्णे सदापूर्णे शङ्करप्राणवल्लभे।
ज्ञानवैराग्यसिद्ध्यर्थं भिक्षां देहि च पार्वति॥ ११॥

Annapurne sadapurne Shankara prana vallabhe.
Jnana vairagya siddhyartham bhiksham dehi cha Parvati.

12 माता च पार्वती देवी पिता देवो महेश्वरः।
बान्धवाः शिवभक्ताश्च स्वदेशो भुवनत्रयम्॥ १२॥

Mata cha Parvati devi pita devo Maheshvarah.
Bandhavah Shiva bhaktash cha svadesho bhuvana trayam.

Text checked against: Gita Press, Gorakhpur: Devi Stotra Ratnakar (code 1774), Sanskrit with Hindi translation. Meanings, audio and all scripts at nityapaath.com/annapurna-stotram/